# Ganapati Trailokya Mohana Kavacham

# શ્રીમન્ગણપતેઃ ત્રૈલોક્યમોહનકવચમ્

## Document Information

Text title : Ganapati Trailokyamohana Kavacham

File name : gaNapatitrailokyamohanakavacham.itx

Category : ganesha, kavacha

Location : doc_ganesha

Transliterated by : Krishna Vallapareddy

Proofread by : Krishna Vallapareddy, Yash Khasbage

Description/comments : Vighneshvara Stuti Manjari I, (ed.) S. V. Radhakrishna Sastri.

Expanded with phalashrutih

Latest update : February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીમન્ગણપતેઃ ત્રૈલોક્યમોહનકવચમ્

શ્રી ગણેશાય નમઃ ।

નમસ્તસ્મૈ ગણેશાય સર્વવિઘ્નવિનાશિને ।
કાર્યારમ્ભેષુ સર્વેષુ પૂજ્યતે યઃ સુરૈરપિ ॥ ૧॥

શ્રીમન્મહાગણપતેઃ કવચસ્ય ઋષિઃ શિવઃ ।
ગણપતિર્દેવતા ચ ગાયત્રી છન્દઃ એવ ચ ।
ધર્માર્થકામમોક્ષેષુ વિનિયોગઃ પ્રકીર્તિતઃ ।
શક્તિઃ સ્વાહા ગ્લૌँ બીજં વિનિયોગસ્ય કીર્તિતઃ ॥

અથ ન્યાસઃ ।
ૐ શ્રીँ હ્રીँ ક્લીँ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ગ્લૌँ ગँ ગણપતયે તર્જનીભ્યાં નમઃ ।
વરવરદ મધ્યમાભ્યાં નમઃ ।
સર્વજનં મે અનામિકાભ્યાં નમઃ ।
વશમાનય કનિષ્ઠિકાભ્યાં નમઃ ।
સ્વાહા કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિ ન્યાસઃ ॥

ધ્યાનં -
હસ્તીન્દ્રાનનમિન્દુચૂડમરુણચ્છાયં ત્રિનેત્રં રસા
    દાશ્લિષ્ટં પ્રિયયા સપદ્મકરયા સ્વાઙ્કસ્થયા સન્તતમ્ ।
બીજાપૂરગદાધનુસ્ત્રિશિખયુક્ ચક્રાબ્જપાશોત્પલ
    વ્રીહ્યગ્રસ્વવિષાણરત્નકલશાન્ હસ્તૈર્વહન્તં ભજે ।
અથ કવચમ્ ।
ૐ બ્રહ્મબીજં શિરઃ પાતુ કેવલં મુક્તિદાયકમ્ ।
શ્રીँ બીજમક્ષિણી પાતુ સર્વસિદ્ધિસમર્પકમ્ ॥ ૧॥

હૃલ્લેખા શ્રોત્રયોઃ પાતુ સર્વશત્રુવિનાશિની ।

કામબીજં કપોલૌ ચ સર્વદુષ્ટનિવારણમ્ ॥ ૨॥

ગ્લૌં ગં ચ ગણપતયે વાચં પાતુ વિનાયકઃ ।
વરબીજં તથા જિહ્વાં વરદં હસ્તયોસ્તથા ॥ ૩॥

સર્વજનં મે ચ બાહુદ્વયં કણ્ઠં ગણેશ્વરઃ ।
વશં મે પાતુ હૃદયં પાતુ સિદ્ધીશ્વરસ્તથા ॥ ૪॥

નાભિમાનય મે પાતુ સર્વસિદ્ધિવિનાયકઃ ।
જઙ્ઘયોર્ગુલ્ફયોઃ સ્વાહા સર્વાઙ્ગં વિઘ્નનાયકઃ ॥ ૫॥

ગણપતિસ્ત્વગ્રતઃ પાતુ ગણેશઃ પૃષ્ઠતસ્તથા ।
દક્ષિણે સિદ્ધિદઃ પાતુ વામે વિશ્વાર્તિહારકઃ ॥ ૬॥

દુર્જયો રક્ષતુ પ્રાચ્યામાગ્નેય્યાં ગણપસ્તથા ।
દક્ષિણસ્યાં ગિરિજજો નૈરૃત્યાં શમ્ભુનન્દનઃ ॥ ૭॥

પ્રતીચ્યાં સ્થાણુજઃ પાતુ વાયવ્યામાખુવાહનઃ ।
કૌબેર્યામીશ્વરઃ પાતુ ઈશાન્યામીશ્વરાત્મજઃ ॥ ૮॥

અધો ગણપતિઃ પાતુ ઊર્ધ્વં પાતુ વિનાયકઃ ।
એતાભ્યો દશદિગ્ભ્યસ્તુ પાતુ નિત્યં ગણેશ્વરઃ ॥ ૯॥

ઇદં કવચમાહામ્યં ન દેયં યસ્યકસ્યચિત્ ।
યસ્ય સ્મરણમાત્રેણ મૃત્યોર્મૃત્યુભવેત્સ્વયમ્ ॥ ૧૦॥

ઇતીદં કથિતં દેવિ બ્રહ્મવિદ્યાકલેવરમ્ ।
ત્રૈલોક્યમોહનં નામ કવચં બ્રહ્મરૂપકમ્ ॥ ૧૧॥

સપ્તકોટિમહામન્ત્રાસ્તત્રાદૌ કથિતાઃ પ્રિયે ।
મહાગણપતેર્યદ્દિવ્યં કવચં મન્મુખોદિતમ્ ॥ ૧૨॥

ગુરુમભ્યર્ચ્ય વિધિવત્કવચં યઃ પઠેદ્યતઃ ।
ત્રિઃ સકૃદ્વા યથાન્યાસં સોઽપિ પુણ્યયુતો નરઃ ॥ ૧૩॥

દેશિકઃ સર્વમન્ત્રેષુ હ્યાધિકારી જપાદિષુ ।
દેવમભ્યર્ચ્ય વિધિવત્પુરશ્ચર્યાં સમાચરેત ॥ ૧૪॥

અષ્ટોત્તરશતં જપ્ત્વા દશાંશં હવનાદિકમ ।
તતસ્તુ સિદ્ધકવચઃ પૂર્ણતામદનોપમઃ ॥ ૧૫॥

મન્ત્રસિદ્ધિર્ભવેત્તસ્ય પુરશ્ચર્યાવિધાનતઃ ।
ગદ્યપદ્યમયી વાણી તસ્ય વક્ત્રાત્પ્રજાપતે ॥ ૧૬॥

વક્ત્રે તસ્ય વસેદ્વાણી કમલા નિશ્ચલા ગૃહે ।
પુષ્પાઞ્જલ્યષ્ટકં દત્વા મૂલે નૈવ પઠેત્સકૃત્ ॥ ૧૭॥

અપિ વર્ષસહસ્રાયાઃ પૂજાયાઃ ફલમાપ્નુયાત્ ।
વિલિખ્ય ભૂર્જપત્રે તુ સ્વર્ણસ્થ ધારયેદ્યદિ ॥ ૧૮॥

કણ્ઠે વા દક્ષિણે બાહૌ સકુર્યાદ્દાસવત્ જગત્ ।
ત્રૈલોક્યં ક્ષોભવત્યેવ ત્રૈલોક્યવિજયી ભવેત્ ॥ ૧૯॥

તદ્ગાત્રં પ્રાપ્ય શસ્ત્રાણિ બ્રહ્માસ્ત્રાદીનિ યાતિ ચ ।
માન્યાનિ કુસુમાનીવ સુખદાનિ ભવન્તિ હિ ॥ ૨૦॥

સ્પર્ધાન્નિર્ધૂય ભવને લક્ષ્મીર્વાણી મુખે વસેત્ ॥ ૨૧॥

ઇદં કવચમજ્ઞાત્વા યો જપેદ્ગણનાયકમ્ ।
ન સ સિદ્ધિમવાપ્નોતિ મૂઢો વર્ષશતૈરપિ ॥ ૨૨॥

સર્વશત્રુક્ષયકરં સર્વવિઘ્નનિવારણમ્ ।
સર્વાપત્ત્યેકશમનં સર્વમોક્ષસ્ય હેતુકમ્ ॥ ૨૩॥

ઇતિ શ્રીરુદ્રયામલે ગણપતેઃ ત્રૈલોક્યમોહનકવચં સમ્પૂર્ણમ્ ।

Encoded and proofread by Krishna Vallapareddy, Yash Khasbage

*Ganapati Trailokya Mohana Kavacham*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*